# Jaigishavyaproktam Shivanama Stotram

# જૈગીષવ્યપ્રોક્તં શિવનામસ્તોત્રમ્

## Document Information

Text title : Jaigishavyaproktam Shivanama Stotram

File name : jaigIShavyaproktaMshivanAmastotram.itx

Category : shiva, shivarahasya, stotra

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | bhImAkhyaH aShTamAMshaH | adhyAyaH 1 jaigIShavyaprashne skandadhyAnam | 17-28||

Latest update : July 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 5, 2024

*sanskritdocuments.org*

Jaigishavyaproktam Shivanama Stotram

# જૈગીષવ્યપ્રોક્તં શિવનામસ્તોત્રમ્

(શિવરહસ્યાન્તર્ગતે ભીમાખ્યે)

પુરુષં પરમેશાનં સર્વભૂતગુહાશયમ્ ।
વ્યાપ્ય વ્યાપકતાહીનં કારણાનાં ચ કારણમ્ ॥ ૧૭॥

પતીનાં પતિમીશાનમુમાપતિમનામયમ્ ।
ગણાનાં ચ પતિં દેવં શિવં ગૃત્સપતિં પ્રભુમ્ ॥ ૧૮॥

કુલુઞ્ચાનાં પતિં શમ્ભું હરં વ્રાતપતિં વિભુમ્ ।
દિશાં ચ પતિમીશાનમુગ્રં દેવં કપર્દિનમ્ ॥ ૧૯॥

અમ્બિકેશં પશુપતિં પથીનાં પતિમીશ્વરમ્ ।
અન્નાનાં ચ પતિં દેવં બભ્રુશં મીઢુષં શિવમ્ ॥ ૨૦॥

ભવોદ્ભવં મહાદેવં પુષ્ટાનાં પતિમીશ્વરમ્ ।
જગતાં પતિમાશાસ્યં વનાનાં ચ પતિં ભવમ્ ॥ ૨૧॥

ક્ષેત્રાણાં ચ પતિં ભીમં વૃક્ષાણાં શર્વમીશ્વરમ્ ।
કક્ષાણાં ચ પતિં વ્યોમકેશં કોશાદિવર્જિતમ્ ॥ ૨૨॥

જગતાં ચૈવ વિશ્વેશમોષધીનાં મહેશ્વરમ્ ।
પત્તીનાં મેરુધનુષં સત્વાનાં બાણધારકમ્ ॥ ૨૩॥

સહમાનં મહેશાનમાવ્યાધિપતિમીશ્વરમ્ ।
સર્વેષાં તસ્થુષાણાં (ષાં ચૈવ) ચ જઙ્ગમાનાં પતિં પ્રભુમ્ ॥ ૨૪॥

- -

સર્વૈશ્વર્યેણ સમ્પન્નં નામ્ના સર્વેશ્વરં શિવમ્ ।
અનામરૂપં દેવેશં સર્વાવાસં ચ દૂરગમ્ ॥ ૨૫॥

સર્વભૂતૈકશરણં શરણ્યં શરણાર્થિનામ્ ।
મહાકારુણિકં સામ્બં ભક્તાનામભયપ્રદમ્ ॥ ૨૬॥

સર્વેન્દ્રિયાર્થસહિતં વિષયાદિવિવર્જતમ્ ।
સર્વેન્દ્રિયગુણાતીતં સર્વાધારમનામયમ્ ॥ ૨૭॥

સર્વસ્ય પ્રભુમીશાનં નાત્યકિઞ્ચિન્તમં સ્તવૈઃ ।
ધ્યાત્વા હૃત્પઙ્કજે દેવમુમયા સહિતં શિવમ્ ॥ ૨૮॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે જૈગીષવ્યપ્રોક્તં શિવનામસ્તોત્રં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । ભીમાખ્યઃ અષ્ટમાંશઃ । અધ્યાયઃ ૧ જૈગીષવ્યપ્રશ્ને સ્કન્દધ્યાનમ્ । ૧૭-૨૮॥

- .. shrIshivarahasyam . bhImAkhyaH aShTamAMshaH . adhyAyaH 1 jaigIShavyaprashne skandadhyAnam . 17-28..

Proofread by Ruma Dewan

---

*Jaigishavyaproktam Shivanama Stotram*

pdf was typeset on July 5, 2024

Please send corrections to *sanskrit@cheerful.com*